Totalbhakti.com

# श्रीसूक्तम्

ॐ हिरण्यवर्णा हरिणीं सुवर्णरजतस्रजाम्।

चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदो मऽआवह।।1।।

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।

यस्या हिरण्यं विन्देयं गामश्वं पुरुषानहम्।।2।।

अश्वपूर्णा रथमध्यां हस्तिनादप्रमोदिनीम्।

श्रियं देवीमुपह्वये श्रीर्मा देवीजुषताम्।।3।।

कां सोस्मितां हिरण्यप्राकारामाद्रा ज्वलन्तीं तृप्तां तर्पयन्तीम्।

पद्मस्थितां पद्मवर्णा तामिहो पह्वये श्रियम्।।4।।

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।

तां पद्मिनींमीं शरणं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणोमि।।5।।

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।

तस्य फ़लानि तपसानुदन्तु या अन्तरा याश्च बाह्या अलक्ष्मीः।।6।।

उपैतु मां देवसखः कीर्तिश्च मणिना सह।

प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातु मे।।7।।

क्षुत्पिपासामलां जयेष्ठामलक्ष्मीं नाशयाम्यहम्।

अभूतिमसमृद्धिं च सर्वा निणुद मे गृहात्।।8।।

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।

ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।।9।।

www.totalbhakti.com

मनसः काममाकूतिं वाचः सत्यमशीमहि।

पशुनां रुपमन्नस्य मयि श्रीः श्रयतां यशः ।।10।।

कर्दमेन प्रजाभूता मयि सम्भवकर्दम ।

श्रियं वासय मे कुले मातरं पद्मालिनीम् ।।11।।

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।

निच देवी मातरं श्रियं वासय मे कुले ।।12।।

आर्द्रा पुष्करिणीं पुष्टिं पिंगलां पद्मालिनीम्।

चन्द्रां हिरण्मयीं लक्ष्मी जातवेदो में आवह ।।13।।

आर्द्रा यः करिणीं यष्टिं सुवर्णां हेममालिनीम्।

सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।14।।

तां म ऽ आवह जातवेदो लक्ष्मीमनपगामिनीम्।

यस्या हिरण्य प्रभूतं गावो दास्योऽश्वन्विन्देयं पुरुषानहम् ।।15।।

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।

सूक्तमं पंचदशर्च च श्रीकामः सततं जपेत् ।।16।।

www.totalbhakti.com